श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ नामवैभवस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using $\LaTeX$ and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नामवैभवस्तबकः ॥

धाम्ना दृश्येय राजीवधाम्ना तेन दयालुना।
आम्नानं जातु चिद्यस्य नाम्नां ज्ञानैर्युनक्ति नः॥ १॥

अर्णवेन्द्रतनयेऽतिदुःसहैर्दुर्नरेशगुणवर्णनातपैः।
आर्तया रसनयाद्य शीतलं कीर्तयामि तव नाम केवलम्॥ २॥

राजीवगेहे तव मर्त्यराजीराजीवयन्ति व्यसनाग्निमग्नाः।
नामानि यः कीर्तयते स धन्यो वैमानिकानामपि माननीयः॥ ३॥

पञ्चेषुचापलपलायनसिद्धमन्त्रं घण्टाविशेषनिनदं कुहनापिशाच्याः।
कोपानलप्रशमसान्त्ववचो मुरारेः के नाम नाम न जपन्ति तवाब्धिकन्ये॥ ४॥

आम्नायदुग्धजलधेरमृतं मदम्ब नित्यद्विषां प्रहरणे द्रुहिणास्त्रमन्त्रः।
नारायणस्य किल नित्यजपस्त्वदीयं नाम प्रगल्भतममभ्युदयं तनोतु॥ ५॥

नामरक्षणपरस्तवोचितं नामरक्षणपरः क्षितौ रमे।
यस्तनोति तव नामयोजनं सोऽयमद्भुतमनामयो जनः॥ ६॥

साम्नां जन्मान्तरमखिलऋग्वर्गसर्गान्तरं वा
पर्यायो वा सकलयजुषां प्रक्रियाथर्वणानाम्।
वेदान्तानां किमु विनिमयो विश्रुतं विश्वमातः
दिव्यं भव्यं दिशति जपतां देवि नाम त्वदीयम्॥ ७॥

त्रय्यन्तैकप्रणयिमतयस्तापसाः पापसार्थ
प्रत्यादेशप्रमुदितमहाचेतसः स्फीतसत्त्वाः।
नाम श्रीमत्तव किल लसत्कीर्तयः कीर्तयन्तो
मातर्मुक्तौ विहितकुतुका मोदयन्ते प्रियं ते॥ ८॥

भास्वद्वर्णं वृषगिरिपतेर्भावुकं तन्वता ते
धाम्ना धाम स्फुरति जलधेः पुत्रि नाम्ना च नाम।
रम्यं हर्म्यस्थलमपि महीरक्षिणः शैलतुङ्गं
दीपारोपं रजनिषु विना देवि देदीप्यते किम्॥ ९ ॥

अप्यस्माकं वचनमचमत्कारि कंसारिकान्ते
प्राज्ञास्वाद्यं प्रभवति भवन्नामधेयानुषङ्गात्।
कर्पूरादिस्थिरपरिमलद्रव्यसाचिव्यभूम्ना
निर्गन्धे स्यादपि सुरभिता निम्बकाष्ठस्य चूर्णे॥ १० ॥

अम्बा लक्ष्मीरमृतसहभूरब्धिराजन्यकन्या
पद्मा विश्वम्भरसहचरी पद्मसद्मा रमेति।
यो नामैवं प्रपिबति भवन्नामनामामृतौघं
तस्यैवाहुर्जननि सुलभां संसृतिश्रान्तिशान्तिम्॥ ११ ॥

न बहून् बहु मन्महे मनून् न च वाचो जरतीरधीमहे।
प्रयताः प्रयतामहे वयं तव नाम्नां हरिपत्नि कीर्तने॥ १२ ॥

अनिरास्यमधोक्षजप्रिये भवरोगं बहुलङ्घनैरपि।
तरितुं प्रभवन्ति लीलया तव नामौषधसेविनो नराः॥ १३ ॥

न हि नन्तुमनन्तमीश्महे न च निर्माणकथापि कर्मणाम्।
कमले कुलहीनवर्तिनः कलयामस्तव नामकीर्तनम्॥ १४ ॥

विविधानि तवाधुना तु नाम व्यसनान्यब्धिसुते धुनातु नाम।
अपि यज्जपतः कलावहानि स्युरमून्युज्ज्वलधीकलावहानि॥ १५ ॥

राष्ट्रप्रसङ्गकुजनस्तुतिराजकार्य दुस्तर्कवादपरदूषणदोषशान्त्यै।
नारायणप्रियतमे ननु पावनानि नामानि कीर्तयतु ते रसना मदीया॥ १६ ॥

प्रादेशसंमितनिजोदरपूरणार्थैरत्यर्थमेभिरनृतैरभिदह्यमाना।
निर्वातु नीरधिसुते रसना त्वदीयैराख्याशतैरभिमतैरमृतैरिवासौ॥ १७ ॥

अगतिकदेहिदेहिवचनश्रुतिदुःखदशा
    कुपितमितम्पचस्तवन दुष्कृत निष्कृतयः।
भवदभिधासुधा भवदवानलतापमुषो
    जननि पुनः पुनः परिपुनन्ति जगन्ति रमे॥ १८॥

श्रुतिफणितिस्थितिस्मृतिपुराणततिश्रवणे
    भगवति मादृशां जगति न प्रतिभाति गतिः।
तदपि तव त्वदीयदयितस्य च नामजपो
    जयति कलौ युगे जडधियामपि कामदुघा॥ १९॥

मनसिजतातपादमनसः परितुष्टिकरं
    जननि समानमेव ननु साम च नाम च ते।
अतिशयमादिमादपरमेव तथाप्ययते
    निधनमुपद्रवं च न कदापि यतः सहते॥ २०॥

पापाटोपनिदाघवर्जनकृते पर्जन्यगर्जायते
    व्याधिव्यालकुले पतत्पतिगरुद्वातूलनादायते।
दारिद्र्यद्विरदेन्द्रवारणविधौ सिंहाट्टहासायते
    पद्मे तावकनाम संसृतिनिशि प्रत्यूषकालायते॥ २१॥

राजीवायतनेति दैत्यजिदुरोरक्षेति लक्ष्मीरिति
    क्षीराब्धेर्दुहितेति कैटभरिपोर्दारा इति श्रीरिति।
श्रेयः साधनदेवतेति जगतां मातेति सीतेति च
    प्रातर्मातरुपास्महे कृतशुभस्थेमानि नामानि ते॥ २२॥

अञ्चत्पञ्चषवर्णमर्णवसुते त्वन्नामकर्णामृतं
    मत्पापानि महत्तराण्यपि मुहुर्मुष्णाति कृष्णाङ्गने।
अक्षीणि प्रतिरुन्धदन्धतमसं गेहेषु भूयिष्ठम-
    प्यङ्गुष्ठप्रमितैव दीपकलिका हा हन्त नो हन्ति किम्॥ २३॥

अवितुमुदधिकन्यकेऽचिकित्स्याद्मरणजरादिमयान्महामयान्माम्।
परमविषममान्तरं कषायं पचति शुचिर्भवदीयनामवर्गः॥ २४॥

कृतशुभतति धारितं कृतार्थैर्भगवति भोग्यमतीव पावनं च।
अभिदधति सुवर्णमात्मवन्तः प्रशमितदुर्गति नाम तावकीनम्॥ २५॥

हरिसखि तव धूतक्लेशभूमानि नामा-
    न्यहरहरहमुद्यद्भक्तिराकर्ण्य धन्यः।
जहि दलय बधान च्छिन्धि भिन्धीति घोरं
    यमभटरटितं तद्भूरि दूरीक्रियासम्॥ २६॥

स्वपदन्यसनेन चारुवर्णा सुरवागोष्ठविशुद्धिहेतुभूता।
कमले मम काङ्क्षितानि दुग्धे स्तवनार्हा तव नामकामधेनुः॥ २७॥

तव दिव्यनाम्नि मधुरे निराकृतव्यसने स्थितेऽपि रसनेन्द्रियं मम।
रमते रमे कथमहो रसान्तरेष्वथ वा तदस्य घटते जलात्मनः॥ २८॥

त्वन्नामदिव्यकुसुमानि दृढैर्गुणैस्ते संग्रथ्य सौरभविशेषपरिष्कृतानि।
आमुञ्चतादिह मदीयसरस्वतीयं मातर्महापुरुषमानसरञ्जनाय॥ २९॥

मन्वन्तराण्यम्ब फलं तनीयस्तन्वन्ति मन्वन्तरमात्रवर्ति।
आमुष्मिकं शाश्वतमैहिकं वा त्वन्नाम किं नाम फलं न दत्ते॥ ३०॥

वर्णत्रयात्मा प्रणवः स्वनिष्ठां वर्णत्रयीमेव पुनाति युक्तम्।
एकद्विवर्णापि रमे तवाख्या चित्रं पुनीते चतुरोऽपि वर्णान्॥ ३१॥

व्याजादुपात्तमपि वारिधिराजकन्ये त्वन्नाम कामपि ददाति मुदां समृद्धिम्।
आपीतमुल्बणतपातपतापशान्त्यै दूरीकरोति दुरितान्यपि वारि गाङ्गम्॥ ३२॥

यो वक्ति देवि पदमेकमपि त्वदीयं
    सर्वाणि तस्य हृदि भान्ति सदा पदानि।
नित्योन्नतो नृपतिरेव वशीकृतश्चेत्
    किङ्कुर्वते पुरजना इति कः प्रयत्नः॥ ३३॥

क्षमानिधे यम्यधिपाभिधेयं वाचो विधेयं तव नामधेयम्।
पद्मालये यस्य गुणोदधेऽयं पचेलिमं विन्दति भागधेयम्॥ ३४॥

स्वनाथनाम्नः स्वयमुत्तरं सत् तवाभिधानं गुणमादधाति।
पद्मेक्षणप्रेयसि निर्विगानं प्रमाणमत्र प्रणवं प्रतीमः॥ ३५ ॥

पद्मे नाम्नां पामरास्तावकानां प्रौढिं विद्युर्नैव नामान्तरेभ्यः।
चक्रीवन्तश्चारुकर्पूरचूर्णे भस्मभ्यः किं विस्मयं प्राप्नुवन्ति॥ ३६ ॥

जहदिह जननि त्वन्नामधेयं विधेयं
जडमतिरतिरिक्तं शर्मणे कर्म कुर्यात्।
निधिमनवधिमुच्चैर्निष्कुटस्थं विहाय
प्रतिभवनमशङ्कः पर्यटेद्भिक्षितुं कः॥ ३७ ॥

दयोदधे यं तवनामधेयाभिधा सुधेयं यदि तां धयेयम्।
न वाजपेयं कमलेऽजपेयं न वा जपेयं महतोऽपि मन्त्रान्॥ ३८ ॥

शरण वरण मन्त्रे शार्ङ्गिणः प्राणकान्ते
परमपुरुषनाम्नः प्रागुपादीयमानम्।
विशदमहिम नाम क्षिप्रमेकाक्षरं ते
वितरति जपतामप्येकमेवाक्षरं तत्॥ ३९ ॥

कण्ठे कुण्ठितनिस्वने कफचयैरक्षेषु विक्षेपिषु
सुप्ते चेतसि यातनाभिरसुषु क्षिप्रं प्रतिष्ठास्नुषु।
सायासापि समुद्रपुत्रि समयाभिज्ञा रसज्ञा मम
त्वन्नामोपहितं हितं जपतु तद्देवस्य नाम स्वयम्॥ ४० ॥

अभ्यासैः पवमानमन्त्रविततेरब्लिङ्गभङ्ग्यन्तरैः
आदेशैरघमर्षणस्य यमकैरष्टाक्षरस्येन्दिरे।
गायत्र्याः पुनरुक्तिभिः परिपणैरोङ्कारपुंसूक्तयोः
शुद्धिं व्याहृतिसोदरैर्न भजते को नाम ते नामभिः॥ ४१ ॥

प्रायश्चित्तविशुद्ध्यै प्रायश्चितं समस्तपापानाम्।
गायतु तव नामैषा कमले कलितान्यनिरसना रसना॥ ४२ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे नामवैभवस्तबकः ॥